## अनुदात्तङित आत्मनेपदम् । (१२/२१५७)

अविशेषेण धातोरात्मनेपदं परस्मैपदं च विधास्यते, तत्रायं नियमः क्रियते । अनुदात्तेतो ये धातवो ङितश्च, तेभ्य एव [1]आत्मनेपदं भवति नान्येभ्यः । अनुदात्तेद्भ्यः, 'आस' (धा.पा. १०२२)–आस्ते । 'वस' (धा.पा.१०२४)–वस्ते । ङिद्भ्यः [2]खल्वपि, 'षूङ्' (धा.पा. १०३२)–सूते । 'शीङ' (धा.पा. १०३३)–शेते[3] ॥

## भावकर्मणोः । (१३/२६७९)

'लः कर्मणि च भावे चाकर्मकेभ्यः' (३.४.६९/२१५२) इति भावकर्मणोर्विहितस्य लस्य तिबादयः सामान्येन वक्ष्यन्ते । तत्रेदमुच्यते, भावे कर्मणि[4] चात्मनेपदं भवति । भावे–ग्लायते भवता, [5]सुप्यते भवता, [6]आस्यते भवता । कर्मणि–क्रियते [7]कटः, ह्रियते भारः । कर्मकर्तरि, लूयते केदारः स्वयमेव [8]इति, परस्मैपदं न भवति । तस्य विधाने द्वितीयं कर्तृग्रहणमनुवर्तते । [9]तेन कर्तैव यः कर्ता तत्र परस्मैपदं भवति[10] (१.३.१४/२६८० १.३.७८/२१५९) ॥

## कर्तरि कर्मव्यतिहारे । (१४/२६८०)

कर्मशब्दः क्रियावाची । व्यतिहारो विनिमयः । यत्रान्यसम्बन्धिनीं क्रियामन्यः करोति, इतरसम्बन्धिनीं चेतरः, स कर्मव्यतिहारः । तद्विशिष्ट[11]क्रियावचनाद् धातोरात्मनेपदं भवति । [12]व्यतिलुनते । [13]व्यतिपुनते । कर्मव्यतिहारे इति किम्? लुनन्ति[14] । कर्तृग्रहणमुत्तरार्थं 'शेषात् कर्तरि परस्मैपदम्' (१.३.७८/२१५९) इति ॥

## न गतिहिंसार्थेभ्यः । (१५/२६८१)

पूर्वेणात्मनेपदं प्राप्तं प्रतिषिध्यते । गत्यर्थेभ्यो हिंसार्थेभ्यश्च धातुभ्यः कर्मव्यतिहारे आत्मनेपदं न भवति । व्यतिगच्छन्ति । व्यतिसर्पन्ति[15] । हिंसार्थेभ्यः––व्यतिहिंसन्ति । व्यतिघ्नन्ति ।

[२९] [16]प्रतिषेधे हसादीनामुपसङ्ख्यानम् । (म.भा. १. २७८)
व्यतिहसन्ति । [17]व्यतिजल्पन्ति । व्यतिपठन्ति ।

[३०] हरतेरप्रतिषेधः । (म.भा. १. २७९)
संप्रहरन्ते [18]राजानः ॥

## इतरेतरान्योन्योपपदाच्च । (१६/२६८२)

इतरेतरः, अन्योन्यः इत्येवमुपपदाद्[19] धातोः कर्मव्यतिहारे आत्मनेपदं न भवति । इतरेतरस्य [20]व्यतिलुनन्ति । अन्योन्यस्य व्यतिलुनन्ति ।[21]

---

1. पदस्य लकारस्यैव स्थाने इत्यधिकम् फ. 2. खल्वपि नास्ति क. 3. अनुदात्तमध्येपतितङितः सिद्धमेवात्मनेपदम् । पृथक्करणं 'अनुदात्तेतश्च हलादेः' (3.2.147/3127) विशेषणं ङितो युज् न भवति इत्यधिकम् क, अनुदात्तङितः इति किम्? भवति, चेतति इत्यधिकम् अ, भवति, नयति क, भवति ड. फ. 4. विहि-तस्य लस्य इत्यधिकम् फ. ह. 5. सुप्यते भवता नास्ति क. 6. आस्यते भवता नास्ति फ. 7. घटः फ.ग. 8. इति नास्ति फ. 9. तेन नास्ति ड. 10. इति इत्यधिकम् ड. 11. °क्रियात् ब. 12. लुनते ब, लुनीते फ. 13. पुनीते फ. 14. पुनन्ति इत्यधिकम् क.ड.अ. 15. इति इत्यधिकम् ब. 16. गत्यर्थानां इत्यधिकम् ब. ड. फ.ग. 17. व्यतिजपन्ति ब, नास्ति फ. 18. जनाः ग, क्षत्रियाः फ, प्रहरन्ते क्षत्रियाः ह. 19. च इत्यधिकम् अ.क. 20. व्यतिपुनन्ति फ. 21. अन्योन्यस्य व्यतिपुनन्ति इत्यधिकम् ग.